## Varahi Dwadasa Namavali in Hindi – श्री वाराही द्वादशनामावली

ओं पञ्चम्यै नमः ।
ओं दण्डनाथायै नमः ।
ओं सङ्केतायै नमः ।
ओं समयेश्वर्यै नमः ।
ओं समयसङ्केतायै नमः ।
ओं वाराह्यै नमः । ६
ओं पोत्रिण्यै नमः ।
ओं शिवायै नमः ।
ओं वार्ताल्यै नमः ।
ओं महासेनायै नमः ।
ओं आज्ञाचक्रेश्वर्यै नमः ।
ओं अरिघ्न्यै नमः । १२ ।

इति श्री वाराही द्वादशनामावली ||

## Varaha Mukhi Stavan in Hindi – वराहमुखी स्तवः

कुवलयनिभा कौशेयार्धोरुका मुकुटोज्ज्वला
हलमुसलिनी सद्भक्तेभ्यो वराभयदायिनी ।
कपिलनयना मध्ये क्षामा कठोरघनस्तनी
जयति जगतां मातः सा ते वराहमुखी तनुः ॥ १ ॥

तरति विपदो घोरा दूरात्परिह्रियते भयं
स्खलितमतिभिर्भूतप्रेतैः स्वयं व्रियते श्रिया ।

क्षपयति रिपूनीष्टे वाचां रणे लभते जयं
वशयति जगत्सर्वं वाराहि यस्त्वयि भक्तिमान् ॥ २ ॥

स्तिमितगतयः सीदद्वाचः परिच्युतहेतयः
क्षुभितहृदयाः सद्यो नश्यद्दृशो गलितौजसः ।
भयपरवशा भग्नोत्साहाः पराहतपौरुषाः
भगवति पुरस्त्वद्भक्तानां भवन्ति विरोधिनः ॥ ३ ॥

किसलयमृदुर्हस्तः क्लिश्येत कन्दुकलीलया
भगवति महाभारः क्रीडासरोरुहमेव ते ।
तदपि मुसलं धत्से हस्ते हलं समयद्रुहां
हरसि च तदाघातैः प्राणानहो तव साहसम् ॥ ४ ॥

जननि नियतस्थाने त्वद्वामदक्षिणपार्श्वयो-
-र्मृदुभुजलतामन्दोक्षेपप्रवातितचामरे ।
सततमुदिते गुह्याचारद्रुहां रुधिरासवै-
-रुपशमयतां शत्रून् सर्वानुभे मम दैवते ॥ ५ ॥

हरतु दुरितं क्षेत्राधीशः स्वशासनविद्विषां
रुधिरमदिरामत्तः प्राणोपहारबलिप्रियः ।
अविरतचटत्कुर्वद्दंष्ट्रास्थिकोटिरटन्मुखो
भगवति स ते चण्डोच्चण्डः सदा पुरतः स्थितः ॥ ६ ॥

क्षुभितमकरैर्वीचीहस्तोपरुद्धपरस्परै-
-श्चतुरुदधिभिः क्रान्ता कल्पान्तदुर्ललितोदकैः ।
जननि कथमुत्तिष्ठेत् पातालसर्पबिलादिला
तव तु कुटिले दंष्ट्राकोटी न चेदवलम्बनम् ॥ ७ ॥

तमसि बहुले शून्याटव्यां पिशाचनिशाचर-
-प्रमथकलहे चोरव्याघ्रोरगद्विपसङ्कटे ।
क्षुभितमनसः क्षुद्रस्यैकाकिनोऽपि कुतो भयं
सकृदपि मुखे मातस्त्वन्नाम सन्निहितं यदि ॥ ८ ॥

विदितविभवं हृद्यैः पद्यैर्वराहमुखीस्तवं
सकलफलदं पूर्णं मन्त्राक्षरैरिममेव यः ।
पठति स पटुः प्राप्नोत्यायुश्चिरं कवितां प्रियां
सुतसुखधनारोग्यं कीर्तिं श्रियं जयमुर्वराम् ॥ ९ ॥

इति श्री वराहमुखी स्तवः ।

## Varahi Nigrahashtakam in Hindi – श्री वाराही निग्रहाष्टकम्

देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुरक्तात्मने
मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः ।
तस्याशु त्वदयोग्रनिष्ठुरहलाघातप्रभूतव्यथा-
-पर्यस्यन्मनसो भवन्तु वपुषः प्राणाः प्रयाणोन्मुखाः ॥ १ ॥

देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि
प्रादुर्भूतनृशंसभावमलिनां वृत्तिं विधत्ते मयि ।
यो देही भुवने तदीयहृदयान्निर्गत्वरैर्लोहितैः
सद्यः पूरयसे कराब्जचषकं वाञ्छाफलैर्मामपि ॥ २ ॥

चण्डोत्तुण्डविदीर्णदुष्टहृदयप्रोद्भिन्नरक्तच्छटा
हालापानमदाट्टहासनिनदाटोपप्रतापोत्कटम् ।
मातर्मत्परिपन्थिनामपहृतैः प्राणैस्त्वदङ्घ्रिद्वयं
ध्यानोड्डामरवैभवोदयवशात् सन्तर्पयामि क्षणात् ॥ ३ ॥

श्यामां तामरसाननाङ्घ्रिनयनां सोमार्धचूडां जग-
-त्त्राणव्यग्रहलायुधाग्रमुसलां सन्त्रासमुद्रावतीम् ।
ये त्वां रक्तकपालिनीं हरवरारोहे वराहाननां
भावैः सन्दधते कथं क्षणमपि प्राणन्ति तेषां द्विषः ॥ ४ ॥

विश्वाधीश्वरवल्लभे विजयसे या त्वं नियन्त्रात्मिका
भूतानां पुरुषायुषावधिकरी पाकप्रदाकर्मणाम् ।
त्वां याचे भवतीं किमप्यवितथं यो मद्विरोधीजन-
-स्तस्यायुर्मम वाञ्छितावधिभवेन्मातस्तवैवाज्ञया ॥ ५ ॥

मातः सम्यगुपासितुं जडमतिस्त्वां नैव शक्नोम्यहं
यद्यप्यन्वितदैशिकाङ्घ्रिकमलानुक्रोशपात्रस्य मे ।
जन्तुः कश्चन चिन्तयत्यकुशलं यस्तस्य तद्वैशसं
भूयाद्देवि विरोधिनो मम च ते श्रेयः पदासङ्गिनः ॥ ६ ॥

वाराही व्यथमानमानसगलत्सौख्यं तदाशाबलिं
सीदन्तं यमप्राकृताध्यवसितं प्राप्ताखिलोत्पादितम् ।
क्रन्दद्बन्धुजनैः कलङ्कितकुलं कण्ठव्रणोद्यत्कृमिं
पश्यामि प्रतिपक्षमाशु पतितं भ्रान्तं लुठन्तं मुहुः ॥ ७ ॥

वाराही त्वमशेषजन्तुषु पुनः प्राणात्मिका स्पन्दसे
शक्तिव्याप्तचराचरा खलु यतस्त्वामेतदभ्यर्थये ।
त्वत्पादाम्बुजसङ्गिनो मम सकृत्पापं चिकीर्षन्ति ये
तेषां मा कुरु शङ्करप्रियतमे देहान्तरावस्थितिम् ॥ ८ ॥

इति श्री वाराही निग्रहाष्टकम् ।

## Varahi Anugraha Ashtakam in Hindi – श्री वरही अनुग्रह अष्टकम्

**ईश्वर उवाच ।**

मातर्जगद्रचननाटकसूत्रधार-
-स्त्वद्रूपमाकलयितुं परमार्थतोऽयम् ।
ईशोऽप्यमीश्वरपदं समुपैति तादृक्
कोऽन्यः स्तवं किमिव तावकमादधातु ॥ 1 ॥

नामानि किन्तु गृणतस्तव लोकतुण्डे
नाडम्बरं स्पृशति दण्डधरस्य दण्डः ।
तल्लेशलङ्घितभवाम्बुनिधी यतोऽयं
त्वन्नामसंस्मृतिरियं न पुनः स्तुतिस्ते ॥ 2 ॥

त्वच्चिन्तनादरसमुल्लसदप्रमेया-
-ऽऽनन्दोदयात्समुदितः स्फुटरोमहर्षः ।
मातर्नमामि सुदिनानि सदेत्यमुं त्वा-
-मभ्यर्थयेऽर्थमिति पूरयताद्दयालो ॥ 3 ॥

इन्द्रेन्दुमौलिविधिकेशवमौलिरत्न-
-रोचिश्चयोज्ज्वलितपादसरोजयुग्मे ।

चेतो नतौ मम सदा प्रतिबिम्बिता त्वं
भूयो भवानि भवनाशिनि भावये त्वाम् ॥ 4 ॥

लीलोद्धृतक्षितितलस्य वराहमूर्ते-
-र्वाराहमूर्तिरखिलार्थकरी त्वमेव ।
प्रालेयरश्मिसुकलोल्लसितावतंसा
त्वं देवि वामतनुभागहरा हरस्य ॥ 5 ॥

त्वामम्ब तप्तकनकोज्ज्वलकान्तिमन्त-
-र्ये चिन्तयन्ति युवतीतनुमं गलान्ताम् ।
चक्रायुधां त्रिनयनां वरपोत्रिवक्त्रां
तेषां पदाम्बुजयुगं प्रणमन्ति देवाः ॥ 6 ॥

त्वत्सेवनस्खलितपापचयस्य मात-
-र्मोक्षोऽपि यस्य न सतो गणनामुपैति ।
देवासुरोरगनृपूजितपादपीठः
कस्याः श्रियः स खलु भाजनतां न धत्ते ॥ 7 ॥

किं दुष्करं त्वयि मनोविषयं गतायां
किं दुर्लभं त्वयि विधानुवदर्चितायाम् ।
किं दुर्भरं त्वयि सकृत्स्मृतिमागतायां
किं दुर्जयं त्वयि कृतस्तुतिवादपुंसाम् ॥ 8 ॥

इति श्री वाराह्यनुग्रहाष्टकम् ।

## Varahi Kavacham in Hindi – श्री वाराही कवचम्

अस्य श्रीवाराहीकवचस्य त्रिलोचन ऋषीः । अनुष्टुप्छन्दः । श्रीवाराही देवता । ॐ बीजं । ग्लौं शक्तिः । स्वाहेति कीलकं । मम सर्वशत्रुनाशनार्थे जपे विनियोगः ॥

**ध्यानम्**

ध्यात्वेन्द्र नीलवर्णाभां चन्द्रसूर्याग्नि लोचनां ।
विधिविष्णुहरेन्द्रादि मातृभैरवसेविताम् ॥ १॥

ज्वलन्मणिगणप्रोक्त मकुटामाविलम्बितां ।
अस्त्रशस्त्राणि सर्वाणि तत्तत्कार्योचितानि च ॥ २॥

एतैस्समस्तैर्विविधं बिभ्रतीं मुसलं हलं ।
पात्वा हिंस्रान् हि कवचं भुक्तिमुक्ति फलप्रदम् ॥ ३॥

पठेत्त्रिसन्ध्यं रक्षार्थं घोरशत्रुनिवृत्तिदं ।
वार्ताली मे शिरः पातु घोराही फालमुत्तमम् ॥ ४॥

नेत्रे वराहवदना पातु कर्णौ तथाञ्जनी ।
घ्राणं मे रुन्धिनी पातु मुखं मे पातु जन्धिन् ॥ ई ५॥

पातु मे मोहिनी जिह्वां स्तम्भिनी कन्थमादरात् ।
स्कन्धौ मे पञ्चमी पातु भुजौ महिषवाहना ॥ ६॥

सिंहारूढा करौ पातु कुचौ कृष्णमृगाञ्चिता ।
नाभिं च शङ्खिनी पातु पृष्ठदेशे तु चक्रिणि ॥ ७॥

खड्गं पातु च कट्यां मे मेढ्रं पातु च खेदिनी ।
गुदं मे क्रोधिनी पातु जघनं स्तम्भिनी तथा ॥ ८॥

चण्डोच्चण्डश्चोरुयुगं जानुनी शत्रुमर्दिनी ।
जङ्घाद्वयं भद्रकाली महाकाली च गुल्फयो ॥ ९॥

पादाद्यङ्गुलिपर्यन्तं पातु चोन्मत्तभैरवी ।
सर्वाङ्गं मे सदा पातु कालसङ्कर्षणी तथा ॥ १०॥

युक्तायुक्ता स्थितं नित्यं सर्वपापात्प्रमुच्यते ।
सर्वे समर्थ्य संयुक्तं भक्तरक्षणतत्परम् ॥ ११॥

समस्तदेवता सर्वं सव्यं विष्णोः पुरार्धने ।
सर्वशत्रुविनाशाय शूलिना निर्मितं पुरा ॥ १२॥

सर्वभक्तजनाश्रित्य सर्वविद्वेष संहतिः ।
वाराही कवचं नित्यं त्रिसन्ध्यं यः पठेन्नरः ॥ १३॥

तथाविधं भूतगणा न स्पृशन्ति कदाचन ।
आपदश्शत्रुचोरादि ग्रहदोषाश्च सम्भवाः ॥ १४॥

मातापुत्रं यथा वत्सं धेनुः पक्ष्मेव लोचनं ।
तथाङ्गमेव वाराही रक्षा रक्षाति सर्वदा ॥ १५॥

इति श्री वाराही कवचम् सम्पूर्णम् ।